श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमहालक्ष्म्यै नमः

श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे

# ॥ मङ्गलाख्यस्तबकः सप्तमः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

# ॥ मङ्गलाख्यस्तबकः सप्तमः ॥

भागधेयं भजेयं तत् फणिशैलकुटुम्बिनः।
मनीषिणो यदेवाहुः मङ्गलानां च मङ्गलम्॥ **7.1** ॥

तनोति सिन्धोस्तनये कथञ्चित्
तवांशलेशो यदि सन्निधानम्।
तृणोऽपि माङ्गल्यमुपैत्यखर्वं
दूर्वादिरेवात्र निदर्शनं नः॥ **7.2** ॥

गरुडध्वज वल्लभे शुभे
गणवर्णादिज दोष शान्तये।
वरदे तव वाचकं पदं
कवयः काव्यमुखे प्रयुञ्जते॥ **7.3** ॥

विदुः पदाब्जं तव विश्वमङ्गलं
हरिप्रिये यत्परिवार वैभवात्।
समाश्रिता स्थाणुमपि श्मशानगं
जगत्यपर्णाऽजनि सर्वमङ्गला॥ **7.4** ॥

तातो दुग्धपयोनिधिः सहभुवस्ते कौस्तुभाद्याः शुभाः
देवस्त्वव्यय दिव्य मङ्गलवपुः श्रीवत्सलक्ष्मा पतिः।
नाम श्रीरिति धाम पद्ममखिल क्षेमङ्करः पक्षिराट्
वाहः को हरिवल्लभे कथयितुं माङ्गल्यमीष्टे तव॥ **7.5** ॥

यस्तु श्रीर्न पुरस्करोत्यविनयाद्वस्तु त्वदीयं शुभं
तस्मिन् नृत्यति दुर्गतिश्चिरतरं तत्र प्रमाणं तु नः।
दुर्वासः प्रतिघोद्गमादधिगतः स्वर्वासवत्त्वच्युतिं
दिव्यं माल्यमहो मदादगणयन् देवः शचीवल्लभः॥ **7.6** ॥

दृष्टिः शिवोदयकरी करुणाभिरार्द्रा
युक्तं तवाम्ब भजते भवतारकत्वम्।
ज्येष्ठाश्रयोऽपि मघवान् स्तुतिभिस्तवाहो
प्राप्यातुलोऽजनि पुनर्वसुवर्गमुच्चम्॥ **7.7** ॥

फणिशयदयिते तव स्तुतिः
भगवति पावनरीतिमाश्रिता।
अवितथमत एव तद्बलात्
शुभमगतोऽपि सुमङ्गलत्यहो॥ **7.8** ॥

त्वद् भ्रातुरिन्दोरनुचारयोगात्
प्रायेण मूढोऽप्यशुभः कुजन्मा।
सुभूविभूषे स बुधाग्रगण्यो
बभूव जग्राह च मङ्गलाख्याम्॥ **7.9** ॥

जगृहे क्वचिदच्युतोऽवतारे
जगतां मातरिनान्वयं पुरा यः।
तमजस्रमिनान्वयं नयन्ती
शिवतातं शिवतातिमातनोषि॥ **7.10** ॥

कूत्पत्तिमूलमपि केशवपादपद्मं
कल्याणि ते शुभ कराम्बुज मेलनेन।
त्रैलोक्यमङ्गल मजीजनदब्धिकन्ये
तीर्थं शिवत्वपरिदायि कपालिनोऽपि॥ **7.11** ॥

कन्ये दुग्धोदन्वतस्तावकीनं
    मन्ये रूपं मङ्गलं मङ्गलानाम्।
यत्सावर्ण्यप्राप्तभद्रा हरिद्रा
    सौमङ्गल्यं संविधत्ते वधूनाम्॥ **7.12** ॥

यस्ते रूपमुपास्ते
    शुभं प्रपन्नं श्रियं हरिद्राजाम्।
तत्क्रतुनयेन स वहेत्
    अमुत्र जननि श्रियं हरिद्राजाम्॥ **7.13** ॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे मङ्गलाख्यस्तबकः सप्तमः॥